## ॥ श्रीमूकाम्बिकायाः अष्टोत्तरशतनामावलिः ॥

ॐ श्रीनाथादितनूत्थ श्रीमहालक्ष्म्यै नमो नमः ।

ॐ भवभावित चित्तेजःस्वरूपिण्यै नमो नमः ।

ॐ कृतानङ्गवधूकोटिसौन्दर्यायै नमो नमः ।

ॐ उद्यदादित्यसाहस्रप्रकाशायै नमो नमः ।

ॐ देवतार्पितशस्त्रास्त्रभूषणायै नमो नमः ।

ॐ शरणागत सन्त्राणनियोगायै नमो नमः ।

ॐ सिंहराजवरस्कन्धसंस्थितायै नमो नमः ।

ॐ अट्टहासपरित्रस्तदैत्यौघायै नमो नमः ।

ॐ महामहिषदैत्येन्द्रविघातिन्यै नमो नमः ।

ॐ पुरन्दरमुखामर्त्यवरदायै नमो नमः ।

ॐ कोलर्षिप्रवरध्यानप्रत्ययायै नमो नमः ।

ॐ श्रीकण्ठक्लृप्तश्रीचक्रमध्यस्थायै नमो नमः ।

ॐ मिथुनाकारकलितस्वभावायै नमो नमः ।

ॐ इष्टानुरूपप्रमुखदेवतायै नमो नमः ।

ॐ तप्तजाम्बूनदप्रख्यशरीरायै नमो नमः ।

ॐ केतकीमालतीपुष्पभूषितायै नमो नमः ।

ॐ विचित्ररत्नसम्युक्तकिरीटायै नमो नमः ।

ॐ रमणीयद्विरेफालिकुन्तलायै नमो नमः।

ॐ अर्धशुभ्रांशुविभ्राजल्ललाटायै नमो नमः।

ॐ मुखचन्द्रान्तकस्तूरीतिलकयै नमो नमः।

ॐ मनोज्ञवक्रभ्रूवल्लीयुगलायै नमो नमः।

ॐ रजनीशदिनेशाग्निलोचनायै नमो नमः।

ॐ करुणारससंसिक्तनेत्रान्तायै नमो नमः।

ॐ चाम्पेयकुसुमोद्भासि नासिकायै नमो नमः।

ॐ तारकाभनसारत्नभासुरायै नमो नमः।

ॐ सद्रत्नखचितस्वर्णताटङ्कायै नमो नमः।

ॐ रत्नादर्शप्रतीकाशकपोलायै नमो नमः।

ॐ ताम्बूलशोभितवरस्मितास्यायै नमो नमः।

ॐ कुन्दकुट्मलसङ्काशदशनायै नमो नमः।

ॐ फुल्लप्रवालरदनवसनायै नमो नमः।

ॐ स्वकान्तस्वान्तविक्षोभिचिबुकायै नमो नमः।

ॐ मुक्ताहारलसत्कम्बुकन्धरायै नमो नमः।

ॐ साष्टापदाङ्गदभुजचतुष्कायै नमो नमः।

ॐ शङ्खचक्रवराभीतिकराब्जायै नमो नमः।

ॐ मतङ्गजमहाकुम्भवक्षोजायै नमो नमः।

ॐ कुचभारनमन्मञ्जुमध्यमायै नमो नमः।

ॐ तटित्पुञ्जाभकौशेयसुचेलायै नमो नमः।

ॐ रम्यकिङ्किणिकाकाञ्ची रञ्जितायै नमो नमः।

ॐ अतिमञ्जुलरम्भोरुद्वितयायै नमो नमः।

ॐ माणिक्यमुकुटाष्ठीवसम्युक्तायै नमो नमः।

ॐ देवेशमुकुटोद्दीप्तपदाब्जायै नमो नमः।

ॐ भार्गवाराध्यगाङ्गेयपादुकायै नमो नमः।

ॐ मत्तदन्तावलोत्तंसगमनायै नमो नमः।

ॐ कुङ्कुमागरुभद्रश्रीचर्चिताङ्ग्यै नमो नमः।

ॐ सचामरामरीरत्नवीजितायै नमो नमः।

ॐ प्रणताखिलसौभाग्यप्रदायिन्यै नमो नमः।

ॐ दानवार्दितशक्रादिसन्नुतायै नमो नमः।

ॐ धूम्रलोचनदैतेयदहनायै नमो नमः।

ॐ चण्डमुण्डमहाशीर्षखण्डनायै नमो नमः।

ॐ रक्तबीजमहादैत्यशिक्षकायै नमो नमः।

ॐ मदोद्धतनिशुम्भाख्यभञ्जनायै नमो नमः।

ॐ घोरशुम्भासुराधीशनाशनायै नमो नमः।

ॐ मधुकैटभसंहारकारणायै नमो नमः।

ॐ विरिञ्चिमुखसङ्गीतसामज्ञायै नमो नमः।

ॐ सर्वबाधाप्रशमनचरित्रायै नमो नमः।

ॐ समाधिसुरथक्ष्माभृदर्चितायै नमो नमः।

ॐ मार्कण्डेयमुनिश्रेष्ठसंस्तुतायै नमो नमः।

ॐ व्यालासुरद्विषद्विष्णुस्वरूपिण्यै नमो नमः।

ॐ क्रूरवेत्रासुरप्राणमारणायै नमो नमः।

ॐ लक्ष्मी सरस्वती काली वेषाढ्यायै नमो नमः।

ॐ सृष्टिस्थितिलयक्रीडा तत्परायै नमो नमः।

ॐ ब्रह्मोपेन्द्रगिरीशादिप्रतीक्षायै नमो नमः।

ॐ अमृताब्धिमणिद्वीपनिवासिन्यै नमो नमः।

ॐ निखिलानन्दसन्दोहविग्रहायै नमो नमः।

ॐ महाकदम्बविपिनमध्यगायै नमो नमः।

ॐ अनेककोटिब्रह्माण्डजनन्यै नमो नमः।

ॐ मुमुक्षुजनसन्मार्गदर्शिकायै नमो नमः।

ॐ द्वादशान्तषडम्भोजविहारायै नमो नमः।

ॐ सहस्रारमहापद्मसदनायै नमो नमः।

ॐ जन्मप्रमुखषड्भाववर्जितायै नमो नमः।

ॐ मूलाधारादिषट्चक्रनिलयायै नमो नमः।

ॐ चराचरात्मकजगत् सम्प्रोतायै नमो नमः।

ॐ महायोगिजनस्वान्तनिशान्तायै नमो नमः।

ॐ सर्ववेदान्तसत्सारसंवेद्यायै नमो नमः।

ॐ हृदिनिक्षिप्तनिःशेषब्रह्माण्डायै नमो नमः।

ॐ राजराजेश्वरप्राणवल्लभायै नमो नमः।

ॐ तुषाराचलराजन्यतनयायै नमो नमः।

ॐ सर्वात्मपुण्डरीकाक्षसहोदर्यै नमो नमः।

ॐ मूकीकृतमहामूकदानवायै नमो नमः।

ॐ दुष्टमूकशिरःशैलकुलिशायै नमो नमः।

ॐ कुटजोपत्यकामुख्यनिवासायै नमो नमः।

ॐ वरेण्यदक्षिणार्धाङ्गमहेशायै नमो नमः।

ॐ ज्योतिश्चक्रासनाभिख्यपीठस्थायै नमो नमः।

ॐ नवकोटिमहदुर्गा संवृतायै नमो नमः।

ॐ विघ्नेशस्कन्दवीरेशवत्सलायै नमो नमः।

ॐ कलिकल्मषविध्वंससमर्थायै नमो नमः।

ॐ षोडशार्णमहामन्त्रमन्दिरायै नमो नमः।

ॐ पञ्चप्रणवलोलम्ब पङ्कजायै नमो नमः।

ॐ मिथुनार्चनसंहृष्टहृदयायै नमो नमः।

ॐ वसुदेवमनोभीष्टफलदायै नमो नमः।

ॐ कंसासुरवरारातिपूजितायै नमो नमः।

ॐ रुक्मिणीसत्यभामादिवन्दितायै नमो नमः।

ॐ नन्दगोपप्रियागर्भसम्भूतायै नमो नमः।

ॐ कंसप्राणापहरणसाधनायै नमो नमः।

ॐ सुवासिनी वधूपूजासुप्रीतायै नमो नमः।

ॐ शशाङ्कशेखरोत्सङ्गविष्ठरायै नमो नमः।

ॐ विभुधारिकुलारण्यकुठारायै नमो नमः।

ॐ सञ्जीवनौषधत्रातत्रिदशायै नमो नमः।

ॐ मातृसौख्यार्थिपक्षीशसेवितायै नमो नमः।

ॐ कटाक्षलब्धशक्रत्वप्रद्युम्नायै नमो नमः।

ॐ इन्द्रक्लृप्तोत्सवोत्कृष्टप्रहृष्टायै नमो नमः।

ॐ दारिद्र्यदुःखविच्छेदनिपुणायै नमो नमः।

ॐ अनन्यभावस्वर्गापवर्गदायै नमो नमः।

ॐ अप्रपन्नभवत्रासदायकायै नमो नमः।

ॐ निर्जिताशेषपाषण्डमण्डलायै नमो नमः।

ॐ शिवाक्षिकुमुदाह्लादचन्द्रिकायै नमो नमः।

ॐ प्रवर्तितमहाविद्या प्रधानायै नमो नमः।

ॐ सर्वशक्त्यैकरूप श्रीमूकाम्बायै नमो नमः॥ॐ॥

Encoded by Sri Harsha Ramamurthy, Kamakoti Mandali
srigurupaduka@yahoo.com